# navAkSharIstotram

# નવાક્ષરીસ્તોત્રમ્

## Document Information

Text title : navaakSharii Devi stotra

File name : navAksharI.itx

Category : devii, otherforms, stotra, tyAgarAja, devI, nava

Location : doc_devii

Author : tyAgarAja

Transliterated by : Sridhar Seshagiri seshagir at engineering.sdsu.edu

Proofread by : Sridhar Seshagiri seshagir at engineering.sdsu.edu

Latest update : October 11, 2001

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 28, 2022

*sanskritdocuments.org*

# નવાક્ષરીસ્તોત્રમ્

શ્રીગુરુચરણસરોજં શ્રીકરભવતરણસુકરદૃઢનાવમ્ ।
મચ્ચિતમધુપઝઙ્કૃતમાનન્દં નૌમિ શાઙ્કરં શરણ્યમ્ ॥ ૧॥

ઐન્દ્રધનુર્મરતકમામૈરાવતનાથગીર્ભિરભ્યર્ચ્યામ્ ।
ઐઙ્કારાર્થસ્વરૂપામૈશાનીનાથસેવિતાં વન્દે ॥ ૨॥

હ્રીનતદૈત્યસમૂહાં હૃદ્યાં સુરલોકસેવિતાઙ્ઘ્રિયુગામ્ ।
હ્રીંકારાન્ત્યસરૂપાં હૃદયવિલાસપ્રચોદિતાં વન્દે ॥ ૩॥

ક્લીંકારકામજનનીં ક્લીમિતિશબ્દપ્રપૂરિતદિગન્તામ્ ।
ક્લીબસ્ત્રીપુંશબ્દક્રીડારૂપાં નમામિ વિશ્વમયીમ્ ॥ ૪॥

ચામરબિભ્રદ્વાણીચન્દ્રસજાતાસુસેવ્યપાર્શ્વયુગામ્ ।
ચરણતલમહિષમુણ્ડાં ચાપાદિકરાં નમામિ ચામુણ્ડામ્ ॥ ૫॥

મુણ્ડમણિહારકણ્ઠીં મુકુરકપોલપ્રભાસુશોભમુખીમ્ ।
મુહુરાસ્ફાલિતધનુષં મુરહરભાગિનીં નમામિ મુગ્ધતનુમ્ ॥ ૬॥

ડાકિન્યાદ્યભિતુષ્ટાં ડમરુકનાદેન પૂરિતદિગન્તામ્ ।
ડમ્ભાભિમાનહન્ત્રીં ડામરતન્ત્રપ્રકાશિતાં વન્દે ॥ ૭॥

યૈવર્ણસત્યમાયાયસ્યૈ દત્તાન્યાયુધાનિ શક્રાદ્યૈઃ ।
યૌવનમદસામ્રાજ્યાયૈ તસ્યૈ નમોઽસ્તુ વિદ્યાયૈ ॥ ૮॥

વિશ્વોત્તીર્ણાં વિદ્યાં વિવિધજગચ્ચિત્રકલ્પનારૂપામ્ ।
વિયદાદિસૃષ્ટિહેતું વિશ્વાસૈકપ્રકાશિતાં નૌમિ ॥ ૯॥

ચેતસિ નિતરાં વાસિતચેતોમયિ ચૈત્યચેતને ચતુરે ।
ચમ્પકકલિકાનાસે ચામીકરભાસુરાઙ્ગિ નૌમિ ત્વામ્ ॥ ૧૦॥

અક્ષરનવાક્ષરીયં નિક્ષેપમયી સુવાક્સુધારૂપા ।
એતત્ સ્તોત્રમ્ પઠતાં યચ્છતિ સૌભાગ્યકીર્તિપુષ્ટિધૃતીઃ ॥ ૧૧॥

॥ ઇત્યાનન્દનાથપાદપદ્મોપજીવિના કાશ્યપગોત્રોત્પન્નેનાન્ધ્રેણ
ત્યાગરાજનામ્ના વિરચિતં નવાક્ષરીસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Sridhar  Seshagiri seshagir at engineering.sdsu.edu

*navAkSharIstotram*

pdf was typeset on July 28, 2022

Please send corrections to *sanskrit@cheerful.com*